DOI-10.53571/NJESR.2025.7.4.34-44

# आनन्दवर्धनाचार्यविरचिते देवीशतके छन्दविचारः

सुश्री सोमिना करः
गवेषिका
उत्कलविश्वविद्यालयः, वाणीविहारः

(Received-15March2025/Revised-26March2025/Accepted10April2025/Published28April2025)

**आनन्दवर्धनस्य परिचयः** – आलंकारिकशिरोमणिः आनन्दवर्धनाचार्यः अलंकारशास्त्रजगति एकं विशिष्टं स्थानम् अलंकरोति । व्याकरणवाङ्मये यथा पाणिनिमहर्षेः स्थानं, वेदान्तशास्त्रे यथा शङ्कराचार्यस्य स्थानं, अलङ्कारशास्त्रेऽपि आनन्दवर्धनाचार्यः स्वकीर्त्या तथैव स्थानमलंकरोति । संस्कृतसाहित्यजगति सः न तु केवलमेकः आलङ्कारिकः, एकः महान् कविरपि आसीत् ।

**आनन्दवर्धनाचार्यस्य समयः** – आनन्दवर्धनस्य समयविषये कोऽपि स्पष्टसंकेतः अद्यावधि नोपलभ्यते । कल्हणविरचितस्य "राजतरङ्गिणी" ग्रन्थस्य उल्लेखानुसारं ध्वन्यालोककारः आनन्दवर्धनाचार्यः कश्मीरप्रदेशस्य निवासी आसीत् । कश्मीरप्रदेशस्य राजानकवंशे अस्य जन्म यस्य पितुः नाम आसीत् भट्टनोणः । ध्वन्यालोकस्य एकस्यां पाण्डुलिप्यां तृतीयोद्योतस्य परिशेषे आनन्दवर्धनेन स्वयमेव नोणसूतः इति उल्लिखितम् । सः मातुः परमभक्तः आसीत् । अतः एकदा देवी स्वयमेव स्वप्ने आविर्भूय आनन्दवर्धनस्यकृते आदिष्टवती यत् तस्याः स्तुत्याधारेण एकस्य काव्यस्य रचना भवेदिति । एवमेव मात्रा आदिष्टः सन् आनन्दवर्धनाचार्येण देवीशतकस्य रचना कृता । यस्य उल्लेखः तेनैव देवीशतके एवं कृतः -

देव्या स्वप्नोद्गमादिष्टदेवीशतकसंज्ञया ।
देशितानुपमामाधादतो नोणसुतोनुतिम् ।।[१]

**देवीशतकस्य विषयवस्तु -** आनन्दवर्धनाचार्यः बहूनां साहित्यिक तथा दार्शनिकग्रन्थानाञ्च रचयिता । तस्य कृतिषु प्रमुखा रचना भवति देवीशतकम् । चतुरधिकएकशतश्लोकानां समाहारे शतककाव्येऽस्मिन् बहुविधानां चित्रबन्धानां प्रयोगेण कविना भगवतीदुर्गायाः स्तुतिः विहिता । भक्तिरसात्मके स्तोत्रकाव्येऽस्मिन् मुरजबन्धः, गोमूत्रिकाबन्धः, सर्वतोऽभद्रः, महायमकं, काञ्चीयमकं, आवलियमकं, द्वक्षरः, अर्धभ्रमः, पुनरुक्तवदाभासः, अपशब्दाभासः, पादाभ्यासः, रेफविवर्जितः, प्रहेलिका, चतुरर्थः तथा श्लेषादिनां चित्रवन्धानाञ्च प्रयोगः परिदृश्यते । एतेषाम् अलङ्काराणां एवंविधप्रयोगः आनन्दवर्धनाचार्यस्य विविधालङ्काराणां प्रयोगे तस्य नैपुण्यं प्रदर्शयति । स्तोत्रकाव्येऽस्मिन् कविना आनन्दवर्धनाचार्येण करुणावरुणालयायाः देव्याः भवान्याः अकुपारकृपायाः वर्णना कृता । या देवी स्वयं सृष्टि स्थिति तथा विलयकारिणी, सैव देवी भक्त्या सुलभा इति कविनोक्तम् । काव्येऽस्मिन् वंशस्थः, स्रग्धरा, उपजाति, अनुष्टुप्, शार्दूलविक्रीडितम्, आर्येत्यादयः षट् छन्दांसि कविना प्रयुक्तानि । एतेषां लक्षणपर्यालोचनापुरस्सरं देवीशतकस्योदाहरणानि अत्र प्रस्तूयते ।

**छन्दसः लक्षणं प्रयोजनञ्च -** छन्दते इति छन्दः । पुंलिङ्गे – छन्द् + भावे घञ् प्रत्यये छन्दः इति शब्दकल्पद्रूमकारस्य मतेन । अथवा छदि इत्यस्मात् धातोः छादेरादैश्छः इत्यनेन सूत्रेण असुन्प्रत्यये छन्दः इति शब्दः निष्पद्यते । छन्दयति आह्लादयतीति छन्दः । अमरकोषबलात् छन्दसामाह्लादकरत्वमभ्युपगम्यते । यथा मनुष्यः पादयोः साहायेन तिष्ठति चलति च, तथैव वेदपुरुषोऽपि छन्दसः साहाय्येन तिष्ठति चलति च । अर्थात् यथा पादविहीनः पुरुषः कुत्रापि गन्तुं न शक्नोति तथैव छन्दशास्त्रेण अनभिज्ञः पुरुषोऽपि वेदमार्गमनुसर्त्तुं न प्रभवति । अतः उच्यते – "छन्दः पादौ तु वेदस्य ।[२]"

**आनन्दवर्धनाचार्यविरचिते देवीशतके छन्दसां प्रयोगः –** शतककाव्येऽस्मिन् कविना आनन्दवर्धनाचार्येण बहूनि छन्दांसि प्रयुक्तानि । तेषु कानिचदुदाहरणानि यथा –

| क्र. सं | छन्दनाम | श्लोकसंख्या |
|---|---|---|
| १. | अनुष्टुप् | २, ५, ६, ८, ९, १०, १३, १४, १६, १८, १९, १ २०, २१, २२, २३, २४, ४७, ४८, ५०, ५२, ५३, ५६, ५७, ६०, ६२, ६५, ६६, ६७, ६८, ६९, ७०, ७४, ७७, ७८, ८०, ८२, ८३, ८४, ८५ ८६, ८८, ९०, ९१, ९२, ९३, ९४, ९६, ९७, १०१ |
| २. | आर्या | ४०, ४१, ४२, ४३, ४४, ४५, ७३, ७६, ७९, ९८ |
| ३. | वंशस्थम् | २६, २७, ३४, ३५ |
| ४. | शार्दूलविक्रीडितम् | ३७, ३८, ४६, १०२, १०३, १०४ |
| ५. | उपजाति | २९, ३०, ३१, ३२, ३३, ७५ |
| ६. | स्रग्धरा | २८, ३९, ७२, ७३ |

**अनुष्टुप् छन्दः –** अनुष्टुप् छन्दसः लक्षणं यथा –

श्लोके षष्ठं गुरु ज्ञेयं सर्वत्र लघु पञ्चमम् ।
द्विचतुष्पादयोः ह्रस्वं, सप्तमं दीर्घमन्ययोः ।।[३३]

अनुष्टुप् छन्दः अष्टाक्षरविशिष्टः । छन्दोबद्धश्लोकस्यास्य सर्वेषां पादानां षष्ठवर्णः गुरुः तथा पञ्चमवर्णः लघुः भवति । द्वितीयपादचतुर्थपादयोः सप्तमवर्णः लघुः तथा प्रथमपादतृतीयपादयोश्च सप्तमवर्णः गुरुः भवति । अस्य छन्दसः विभिन्नाः भेदाः सन्ति । तेषु एकः भवति पद्यानुष्टुप् ।

पद्यानुष्टुप् छन्दसः लक्षणं यथा –

पञ्चमं लघु सर्वत्र सप्तमं द्विचतुर्थयोः ।
षष्ठं गुरु विजानीयादेतत्पद्यस्य लक्षणम् ।।[३४]

अर्थात् यस्य श्लोकस्य सर्वेषु चरणेषु पञ्चमम् अक्षरं लघुः द्वितीय तथा चतुर्थ पादयोः सप्तमम् अक्षरं लघुः तथा षष्ठम् अक्षरं गुरु विद्यते, तत्र पद्यानुष्टुप् भवति ।

देवीशतके पद्यानुष्टुप् छन्दसः प्रयोगं कृत्वा अधस्तनः श्लोकः रचितः -

I S I S S S S S I S I I I S I S
नतापनीतक्लेशायाः सुरारिजनतापनी ।

न तापनी तनुर्यस्यास्तुल्या नादीनतापनी ।।[३५]
I S I S I S S S I S S S I S I S

उपरिस्थश्लोके सर्वेषु चरणेषु पञ्चमम् अक्षरं क्रमशः स्तु, मि, ज तथा व एते सर्वे लघ्वक्षराणि सन्ति । द्वितीय पादस्य सप्तमम् अक्षरं 'मि' तथा चतुर्थपादस्य सप्तमम् अक्षरं 'व' लघुः । पुनश्च द्वितीयपादस्य षष्ठमक्षरं 'ता' तथा चतुर्थ पादस्य षष्ठमक्षरं 'लं' गुरुः । अस्मात् ज्ञायते यत् श्लोकोऽयं पद्यानुष्टुप् छन्दोबद्धः ।

देवीशतके अनुष्टुप् छन्दसः प्रयोगः यथा –

S S S S I S S S S I S S I S I S
तां वन्देऽहं नवं देहं ज्ञानरूपं विधाय या

सुधीरस्यति धीरस्य महामोहमयीं त्वचम् ।।[३६]
I S S I I S S I I S S I I S I S

अत्र प्रथमपादे षष्ठवर्णः 'वं', द्वितीयपादे षष्ठवर्णः 'धा', तृतीयपादे षष्ठवर्णः 'धी', चतुर्थपादे षष्ठवर्णः 'यीं' गुरुवर्णाः । सर्वेषां पादानां पञ्चमवर्णाः यथाक्रमेण 'न', 'वि', 'ति' तथा 'म' लघुवर्णाः सन्ति । पुनश्च द्वितीयचतुर्थपादयोः सप्तमवर्णौ 'य' तथा 'त' लघुवर्णौ स्तः । अस्मात् ज्ञायते यत् श्लोकोऽयं अनुष्टुप् छन्दोवद्धः ।

अनेन प्रकारेण देवीशतकस्य २, ५, ६, ८, ९, १०, १३, १४, १६, १८, १९, २०, २१, २२, २३, २४, ४७, ४८, ५०, ५२, ५३, ५६, ५७, ६०, ६२, ६५, ६६, ६७, ६८, ६९, ७०, ७४, ७७, ७८, ८०, ८२, ८३, ८४, ८५, ८६, ८८, ९०, ९१, ९२, ९३, ९४, ९६, ९७, १०१ इत्यादयः श्लोकाः अनुष्टुप् छन्दोबद्धाः ।

**आर्या छन्दः –** शतककाव्येऽस्मिन् कविना बहुषु श्लोकेषु आर्याछन्दसोऽपि प्रयोगः कृतः । छन्दप्रकाशानुसारं छन्दसः अस्य लक्षणं भवति –

यस्याः प्रथमपादे द्वादशमात्रास्तथा तृतीयेऽपि ।
अष्टादश द्वितीये चतुर्थके पञ्चदश साऽऽर्या ।।[३७]

अर्थात् यस्य श्लोकस्य प्रथम – तृतीयपादयोः द्वादश (१२) मात्रा, द्वितीयपादे अष्टादश (१८) मात्राः तथा चतुर्थपादे पञ्चदशमात्राः भवन्ति तत्र आर्याछन्दः इत्युच्यते । देवीशतके अस्य छन्दसः उदाहरणानि यथा –

सुरसुरचितचितनवनवभवभवनानादरादरायेये ।
लयलयचरणौ चरणौ न न मामि नतेन नमामि न ते ।।[३८]
या विस्मयं स्मरभिदा चक्रेऽङ्कारोपिता नवं नारीणाम् ।
विदधे यच्चापस्य न च क्रेंकारोऽपि तानवं नारीणाम् ।।[३९]

अनेन प्रकारेण देवीशतकस्य ४०, ४१, ४२, ४३, ४४, ४५, ७३, ७६, ७९, ९८ इत्यादयः श्लोकाः आर्या छन्दोबद्धाः ।

**वंशस्थ छन्दः –** शतककाव्येऽस्मिन् वंशस्थछन्दसाऽपि कविना कतिपय श्लोकाः विरचिताः । वंशस्थछन्दसः लक्षणं यथा –

उपेन्द्रवज्राचरणेषु सन्ति चेदुपान्त्यवर्णा लघवः कृता यदा ।

सदानतिभ्राजितभारतीरते ! वदन्ति वंशस्थमिदं बुधास्तदा ।।[४७]

जतौ तु वंशस्थमुदीरितं जरौ ।[४८]

वदन्ति वंशस्थविलं जतौ जरौ ।[४९]

अर्थात् यत्र प्रत्येकपादे क्रमशः ज – त – ज – रगणाः भवन्ति, तत्र वंशस्थछन्दः । देवीशतके अस्य प्रयोगः यथा –

I S I S S I I S I S I S  I S I S S I I S I S I S
मनोभवारातिमनोभिरामया जरामयापाकरणैकढक्षया ।

मदक्षयान्निर्मलतां ददानया सदा नयास्था क्रियतां तवार्यया ।।[५०]
I S I S S I I S I S I S I S I S S I I S I S I S

समाययाविन्द्रहिताय या रणे समायया या न जितारिसेनया ।

स मा ययाचे हरमाश्रितः स्फुटं समा यया मुग्धतया मनोज्ञताः ।।[५१]

एतेषु श्लोकेषु प्रत्येकपादे क्रमशः ज – त – ज – रगणाः भवन्ति, अतः लक्षणानुसारम् अत्र वंशस्थछन्दः । अनेन प्रकारेण देवीशतकस्य २६, २७, ३४, ३५ इत्यादयः श्लोकाः वंशसेथ छन्दोबद्धाः ।

**शार्दूलविक्रीडित छन्दः –** शतककाव्यस्यास्य कतिपय श्लोकाः शार्दूलविक्रीडितछन्दोबद्धाः । छन्दशास्त्रानुसारम् अस्य छन्दसः लक्षणं यथा –

सूर्याश्वैर्मसजस्तताः सगुरवः शार्दूलविक्रीडितम् ।।[५४]

अर्थात् यत्र म – स – ज – स – त – तगणाः तथा एकः गुरुवर्णः भवति तत्र शार्दूलविक्रीडितछन्दः । देवीशतके अस्य छन्दसः प्रयोगः यथा –

सत्किं वः सुकृतार्जने विदधती सत्रा यतां त्रायतां
दुर्गा दुर्ग्रहदूषितोद्धतधियामायासदा या सदा ।।
साधूत्साहविधानसक्तमनसां मुख्या ततां ख्याततां
संस्मृत्यैव.............(मत्सरभरस्फीतापदां तापदाम्) ।।[५५]
या मूर्ति किमपि स्मरारिवपुषा धत्ते समायोजितां
या दृष्ट्वैव विनाशमाप सहसा शुम्भः समायोऽजिताम् ।
या नम्रैः सुरसिद्धकिंनरनरैः खेदं विना शस्यते
सा हेतुर्भवतां त्रिलोचनवधूरश्रीविनाशस्य ते ।।[५६]

अत्र म – स – ज – स – त – तगणाः तथा एकः गुरुवर्णः प्रतिपादं प्रतिभान्ति । अतः छन्दलक्षणानुसारम् अत्र शार्दूलविक्रीडितछन्दः । अनेन प्रकारेण देवीशतकस्य ३७, ३८, ४६, १०२, १०३, १०४ इत्यादयः श्लोकाः शार्दूलविक्रीडित छन्दोबद्धाः ।

**उपजाति छन्दः** – शतककाव्येऽस्मिन् कतिपय श्लोकाः उपजाति-छन्दोबद्धाऽपि सन्ति । छन्दसः अस्य लक्षणं यथा –

यत्र द्वयोरप्यनयोस्तु पादा भवन्ति सद् वृत्ततयातिकान्त ।
विद्वद्भिराद्यैः परिकीर्तिता सा प्रयुज्यतामित्युपजाति रेषा ।।[६०]

अर्थात् यस्मिन् छन्दसि इन्द्रवज्रा तथा उपेन्द्रवज्रा छन्दसोः पादानां मिश्रणेन पादः भवति तत्र उपजातिछन्दः जायते । देवीशतके उपजाति छन्दसः प्रयोगः यथा –

उपासते कृष्टिकृतोदया यां जना सदाराधनमीहमानाः
शंभोः प्रसिद्धा तनुतां वहन्ती गौरी हितं सा भवतां विधेयात् ।।[६१]

यां सद्य एव त्रिदशैः पुमांसः समा नमस्यन्ति सदानभोगाः ।
अघानि यस्याः प्रणता विपक्षैः समानमस्यन्ति सदा नभोगाः ।।[६२]

अनेन प्रकारेण देवीशतकस्य २९, ३०, ३१, ३२, ३३, ७५ इत्यादयः श्लोकाः उपजाति छन्दोबद्धाः ।

**स्रग्धरा छन्दः –** कविना आनन्दवर्धनाचार्येण स्वकीयेऽस्मिन् देवीशतके स्रग्धरा छन्दसोऽपि प्रयोगः कृतः । अस्य छन्दसः लक्षणं यथा –

म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्तितेयम् ।[६५]
चत्वारो यत्र वर्णाः प्रथममलघवः षष्टकः सप्तमोऽपि
द्वौ तद्वत्षोडशाद्यौ श्रुतिधरपथभृत् ! षोडशान्त्यौ तथान्त्यौ ।
छन्दःशास्त्राभिलाषिन् ! मुनिमुनिमुनिभिर्दृश्यते चेद्विरामः
शिष्यः स्तुत्यैः कवीन्द्रैः सततनिगदिता स्रगधरा सा प्रसिद्धा ।।[६६]

अर्थात् यस्य श्लोकस्य प्रत्येकपादस्य प्रथमचत्वारो वर्णाः, षष्ठकः तथा सप्तमो वर्णः अपि अलघवः अर्थात् गुरुवर्णाः स्युः, तथैव षोडशाद्यौ अर्थात् षोडशवर्णस्य आदिभूतौ द्वौ वर्णौ चतुर्द्दश तथा पञ्चदश वर्णौ पुनश्च षोडशान्त्यौ अर्थात् सप्तदश तथा अष्टादश वर्णौ पुनरपि तथाऽन्त्यौ अर्थात् द्वौ अन्त्यवर्णौ विंशति तथा एकविंशति वर्णौ एते सर्वे वर्णाः गुरुवर्णाः स्युः तथा प्रत्येकपादस्य प्रति सप्तमाक्षरादनन्तरृंम् अर्थात् सप्तम, चतुर्द्दश तथा एकविंशति वर्णानाम् उपरि विरामः भवेत्, तत्र स्रग्धराछन्दः इत्युच्यते । देवीशतके अस्य उदाहरणं यथा –

S  SSS ISS  III II ISS ISS ISS
सा भावक्षालवर्या नुतविभवितनुर्या वलक्षावभासा

SS SS ISS  III I IIS SIS S ISS
जानानस्याशयप्रा नवनलिनवनप्रायशस्याननाजा ।

SS SSISS  II I I I ISS ISSISS
सातं वर्माननस्था रहसि रसिहरस्थाननर्मावतंसा

SSS S  ISS III IIISSISS  ISS
पायादक्ता रणत्रा मतनमनतमत्राणरक्ता दयापा ।।[६७]

सायासायास्त्रिलोक्याः शरणमकरुणक्षुण्णदैत्यप्रवीरा

स्वैरं स्वैरंशसर्गैर्गहनतममहामोहहार्दं हरन्ती ।

शस्याशस्यादधाना सकलमभिहितं भक्तिभाजः स्मृतैव

स्तादस्तादभ्रदोषा द्विषदुपशमनी सर्वतः पार्वती वः ।।[६८]

अतः छन्दलक्षणानुसारम् अत्र स्रग्धराछन्दः । अनेन प्रकारेण देवीशतकस्य २८, ३९, ७२, ७३ इत्यादयः श्लोकाः श्रग्धराछन्दोबद्धाः ।

# सन्दर्भविवरणानि


१. देवीशतकम्, १०१ (काव्यमाला भाग – ९)

२. पाणिनीयशिक्षा - ४१.

३. श्रुतबोधः, १०.

४. तत्रैव, ११.

५. देवीशतकम्, २.

६. तत्रैव, ४७.

७. श्रुतबोधः, ४.

८. देवीशतकम्, ४०.

९. तत्रैव, ४१.

१०. श्रुतबोधः, ३३.

११. वृत्तरत्नाकरम्, ३/४७.

१२. छन्दोमन्जरी, २/१२/१

१३. देवीशतकम्, २६.

१४. तत्रैव, श्लोक सं. २७.

१५. वृत्तरत्नाकरम्, ३/११.

१६. देवीशतकम्, ३७.

१७. तत्रैव, ३८.

१८. श्रुतबोधः, २३.

१९. देवीशतकम्, २९.

२०. तत्रैव, ३०.

२१. छन्दोमञ्जरी, २/२१.

२२. वृत्तरत्नाकरम्, ३/१०३.

# सहायकग्रन्थसूचिका


१. काव्यमाला, नवमोगुच्छकः, चौखम्भा भारती अकादमी, वाराणसी ।

२. द्विवेदी शिवप्रसाद, ध्वन्यालोकः, चौखम्बा सुरभारती प्रकाशन, वाराणसी ।

३. गुप्ता पुष्पा, संस्कृतसाहित्य का बृहद् इतिहास, ईस्टर्न बुक् लिंकर्स, दिल्ली ।

४. उपाध्याय बलदेव, संस्कृत साहित्य का इतिहास, ५ वी, कस्तुरबा नगर, सिगरा, वाराणसी सं २००१ ।

५. शर्मा श्रीबदरीनाथ, ध्वन्यालोकः, चौखम्बा संस्कृत सीरीज आफिस, वाराणसी, सं. षष्ठ, सन् २००६ ।

६. कुमारी रेखा, ध्वन्यालोकविमर्श, परिमल पब्लिकेशन्स, दिल्ली, प्रथम संस्करण - २०१९ ।

७. शतपथि हरेकृष्ण, संस्कृत साहित्यर इतिहास, कितावमहल, कलेज स्कोयार्, कटक, चतुर्थ संस्करण – २००८ ।

८. Mishra Sobhit, Dhvanyāloka of Ānandavardhanāchārya, Chowkhamba Sanskrit Series Office, Varanasi, 1979.

९. S'armā Badarī Nāth, The Dhvanyāloka of Ānandavardhanā-chārya Swith the Didhiti Commentary Introduction, Index etc, Chowkhamba Sanskrit Series Office, Varanasi 1979.